# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०५)

## २९.१०.२०१२

# पुनरावर्तनम्

- टाप्
  - अजाद्यतष्टाप्
  - टाबृचि
- ङीप्
  - ऋन्नेभ्यो ङीप्
  - उगितश्च
  - वनो र च
  - पादोऽन्यतरस्याम्
  - अन उपधालोपिनोऽन्यतरस्याम्

- टाप्-ङीब्निषेधः
  - न षट्स्वस्रादिभ्यः
  - मनः
  - अनो बहुव्रीहेः
- डाप्
  - डाबुभाभ्यामन्यतरस्याम्

- प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः
  - सर्विका, कारिका

# मामकनरकयोरुपसंख्यानम् (वा)

- मामकनरकशब्दयोः कात्पूर्वस्य इत्वं वक्तव्यमित्यर्थः ।
- मामिका ।
- मामिकेति ।
- नरान् कायतीति नरिका ।
- नरानिति ।

# त्यक्त्यपोश्च (वा)

- त्यगन्ते त्यबन्ते च प्रत्ययस्थात्कात्पूर्वस्याकारस्य इत्वं वक्तव्यम् इत्यर्थः ।
- दाक्षिणात्यिका ।
- इहत्यिका ।

# ४६४. न यासयोः (७.३.४५)

- पदद्वयम् । न, यासयोः ।
- ‘प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः’ (७.३.४४) इत्यतः ‘अतः’, इति, ‘इत्’ इति च अनुवर्तते ।
- यत्तदोः अस्य इत् न स्यात् ।
- यका । सका ।
- सका इति ।
- यकाम् । तकाम् ।
- न यासयोः इति ।

# त्यकनश्च निषेधः (वा)

- त्यकन्प्रत्ययान्तस्यापि 'प्रत्ययस्थात्..' इति इत्वप्रतिषेधो वक्तव्यः इत्यर्थः ।
- उपत्यका । अधित्यका ।
- उपत्यका अधित्यकेति ।

# आशिषि वुनश्च न (वा)

- आशिषि यो वुन्, तस्य योऽयमकादेशः तदकारस्य प्रत्ययस्थात् इति इत्वं नेति वक्तव्यम् इत्यर्थः ।
- जीवका । भवका ।
- जीवका, भवकेति ।

# उत्तरपदलोपे न (वा)

- उत्तरपदलोपेऽपि इत्त्वं नेति वक्तव्यम् इत्यर्थः ।
- देवदत्तिका, देवका ।
- देवकेति ।

# क्षिपकादीनां च न (वा)

- क्षिपकादिशब्दानाम् इत्वं नेति वक्तव्यम् इत्यर्थः ।
- क्षिपका ।
- क्षिपकेति ।
- ध्रुवका ।
- कन्यका ।
- चटका ।
- क्षिपकादिः आकृतिगणः । तेन अलका, इष्टका इत्यादि ।

# तारका ज्योतिषि (वा)

- तारका ज्योतिषीति ।
- अन्यत्र तारिका ।
- अन्यत्रेति ।

# वर्णका तान्तवे (वा)

- वर्णका तान्तव इति ।
- अन्यत्र वर्णिका ।
- अन्यत्रेति ।

# वर्तका शकुनौ प्राचाम् (वा)

- वर्तका शकुनौ प्राचामिति ।
- उदीचां तु वर्तिका ।
- उदीचां त्विति ।

# अष्टका पितृदेवत्ये (वा)

- अष्टका पितृदेवत्ये इति ।
- अष्टिकान्या ।

# सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम् (वा)

- सूतकेति ।
- इह वा अ इति छेदः ।
- कात्पूर्वस्याकारादेशो वेत्यर्थः ।
- तेन पुत्रिकाशब्दे ङीनः इवर्णस्य पक्षेऽकारः ।
- तेनेति ।
- अन्यत्र इत्वबाधनार्थम् अकारस्यैव पक्षेऽकारः ।
- सूतिका, सूतका इत्यादि ।